# AntarDhun Melodic Wisdom Academy

## Course - स्तोत्रदीप
## Shiv Bhakti (शिवभक्ति)

# २. द्वादशज्योतिर्लिङ्गस्मरणम् ।

PDF FILE

# AntarDhun

# Melodic Wisdom Academy

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम्।
उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥१॥

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥२॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुश्मेशं च शिवालये ॥३॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥४॥

इति श्रीशिवमहापुराणे द्वादशज्योतिर्लिङ्गस्मरणं सम्पूर्णम् ।